योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ००४

चतुर्थः सर्गः ४

श्रीवसिष्ठ उवाच ।

मनो बुद्धिरहंकार इन्द्रियादि तथानघ ।

अचेत्यचिन्मयं सर्वं क्व ते जीवादयः स्थिताः ।। १

एकेनैवात्मना दत्ता नानातेयं महात्मना ।

यथैकेनैव चन्द्रेण तिमिराप्पात्रदर्पणैः ।। २

भोगतृष्णाविषावेशो यदैवोपशमं गतः ।

तदैवमस्तमज्ञानमान्ध्यं ध्वान्तक्षयादिव ।। ३

अध्यात्मशास्त्रमन्त्रेण तृष्णाविषविषूचिका ।

क्षीयते भावितेनान्तः शरदा मिहिका यथा ।। ४

मौर्ख्ये क्षीणे क्षतं विद्धि चित्तं राम सबान्धवम् ।

विलीनाम्बुधरे व्योम्नि जाड्यं शाम्यत्यविघ्नतः ।। ५

अचित्तत्वं गते चित्ते क्षीयते वासनाभ्रमः ।

हारमुक्तासमावेशश्छिन्ने तन्ताविवानघ ।। ६

रघुनाथ विघाताय शास्त्रार्थं भावयन्ति ये ।

कृमिकीटत्वयोग्याय चेतसा संमिलन्ति ते ।। ७

नवतामरसाकारकान्तलोचनलोलता ।

शान्ते मौर्ख्येऽक्षता वाते चलता सरसो यथा ।। ८

स्थिरतामुपयातोऽसि भावाभावविवर्जितः ।

पदे परमविस्तारे नभसीव प्रभञ्जनः ।। ९

मन्ये मद्वचनैर्बोधमागतोऽसि रघूद्वह ।

विगताज्ञाननिद्रोऽन्तर्नृपतिः पटहैरिव ।। १०

सामान्ये च लगन्त्येव जने कुलगुरोर्गिरः ।

अत्युदारमतौ राम न लगन्ति कथं त्वयि ।। ११

यत्रोपादेयवाक्यत्वं भावितं स्वेन चेतसा ।

मद्वचोऽन्तर्विशत्युच्चैस्तप्ते क्षेत्रे यथा पयः ।। १२

वयमिह हि महानुभाव नित्यं

कुलगुरवो भवतां रघूद्वहानाम् ।

मदुदितमिदमाशु धार्यमार्य

शुभवचनं हृदि हारवत्त्वयेति ।। १३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु निर्वाणप्रकरणे पू० चित्ताभावप्रतिपादनं नाम चतुर्थः सर्गः ।।४।।